The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 01 | Mar-May 2024 | www.thebrahmi.com

# कुशभद्रामहाकाव्ये काव्यसौन्दर्यम्

डा.प्रियङ्का महान्त (अतिथि अध्यापिका)
(साहित्यविभाग:, सरकारी डिग्रीसंस्कृतमहाविद्यालयः
वारिपदा, मयूरभञ्ज

## शोधसार:

संस्कृतकवय: सत्य-शिव-सुन्दरादीनामेतेषां त्रयाणां वास्तवतत्त्वानामुपासका: भवन्ति। सौन्दर्यपिपासु: कविस्तस्य भावपुञ्जं वहुधा विभाव्य स्वकवितां मण्डयति। तस्य रचना कल्पना जल्पना च सदैव सहृदयानां मनसि भावमाधुर्यं सृजति। कवि: स्वमनीषया यावन्नूतनानि काव्यानि सङ्कलयति तावत् तानि सर्वाणि अभिनवानि प्रतीयन्ते। महाकविमाघदिशा सौन्दर्यतत्त्वमित्थमुटङ्कितम् -

**क्षणे क्षणे यन्नवतामुपैति तदेवरूपं रमणीयताया: ।। (शिशुपालवधम्- ४/१७)**

न केवलं संस्कृतसाहित्यस्य महाकवय: स्वसाहित्ये सौन्दर्यस्य महत्त्वमुपस्थापितवन्त: अपि तु सौन्दर्यस्य अन्तिमसोपाने उपनीता: भूत्वा ते स्वीयकृतिषु लावण्यस्य रूपं विमण्डयन्ति । विशिष्ट-आलंकारिक-आचार्य-आनन्दवर्धनस्य मतानुसारं सौन्दर्यस्य रूपरेखः यथा-

**प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम् ।**
**यत् यत् प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु ।। (ध्वन्यालोक:-१/४)**

**कूटशब्दा:**

**महाकाव्यम्, अलंकार:,छन्द:, सौन्दर्यम् ।**

## उपक्रम:

काव्यस्य सौन्दर्यं न केवलं शब्दगतसौष्ठवभित्तिकमपि तु भावगतसौन्दर्यसन्निवेशितम्। काव्यसौन्दर्यं नाम रसालंकारच्छन्दोभि: परिपूर्णमेव बुद्ध्यते। भारतीयसौन्दर्यसिद्धान्तेषु उपमारूपकादीनामलंकाराणां यथा प्रतीतिर्भवति तथैव वामनदृष्ट्या सर्वे अलंकारा: एव सौन्दर्यालंकाररूपेण प्रकटिता: विद्यन्ते। अत: 'सुन्दरवाक्यमेवालंकार:" इति उक्ते: प्रतिपादनं वामनाचार्येण कृतम्। 'सौन्दर्यमलंकार:" इति तदीये ग्रन्थे काव्यालंकारसूत्रे उद्घोषितम्- यथा शरीरात् लावण्यस्य विच्छेदो न सम्भवति तथा वाक्यात् तदीयं सौन्दर्यं वियोजयितुं न शक्यते।कविदृष्ट्या सौन्दर्यमित्थमालोक्यते- वास्तवत: एकस्या: कामिन्या: अङ्गे स्थितं सौन्दर्यमपरूपलावण्यं सर्वेषां मनासिं आकर्षति, तथैव महाकवीनां कविताकामिन्या: प्रतीयमानार्थ: (ध्वन्यर्थ:) काव्यिकसौन्दर्यस्यान्तिमं रूपलावण्यम्। काव्ये सन्निवेशितान्नलंकारानालंकारिका: सौन्दर्यमिति उद्घोषितवन्त:। सौन्दर्यस्य प्रतीको भवति कवि:। अपि च कवि: क्रान्तदर्शी। अत: कवे: स्वत:स्फूर्त्तभावनात: यत् नि:सरति तदेव काव्यम्। अत्र श्रीप्रफुल्लमिश्र: कुशभद्रामहाकाव्ये सौन्दर्यप्रेमिकविभावेन चित्रितवान् । सौन्दर्यं जीवनस्य स्वतन्त्र-निर्दिष्टरूपरेखत्वेन एकत्वेन वा पुरत: प्रतिभाति तत् मुहुर्मुहु: जीवनयात्रायां अनुदिनं द्रष्टु: निसर्गदृष्टिवलेन सामान्यवस्तुषु अपि वैशिष्ट्यमण्डितत्वेन बहुधा प्रतिफलति। तदेव कुशभद्रामहाकाव्ये मनसा वचसा वपुषा च फलितम्।

## कुशभद्रामहाकाव्ये सौन्दर्यवर्णनम्

कुशभद्रामहाकाव्यस्य कथामुखप्रसङ्गे कवि: श्रीप्रफुल्लमिश्र: कुशभद्रानद्या: तटे जातां रमणीयतां वर्णयति। यत्र वालुकाशय्यासहितं उपरिस्थभागे यथा वलरामस्य मन्दिरं सुरम्यं तथा निकटवर्त्तिशिवालयस्य अपि सर्वजनमनोरमोऽस्ति। इत्थं कुशभद्रानद्या: संगमे ग्रामदेवी स्वतेजसा सर्वेषां दृशा सुदृश्या विद्यते। तस्मिन् पवित्रतमे क्षेत्रे मुनिऋषीणां समवाये वलदेवस्य माहात्म्यमपि मुनिभि: चर्च्यते। यदा वलराम: दिवं गत: तद्दिनादारभ्य दिवंगतदिवसमुपजीव्य रजोत्सवस्य परिपालनं महता आडम्बरेण क्रियते इति। अत: कवि: तस्य काव्यिकसौन्दर्यस्य नैसर्गिकतां परिवेषयितुं कविः वक्ति-

**कुशभद्रातटे रम्ये शोभन्ते वालुकालया: ।**

© 2024, The Brāhmī 

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 01 | Mar-May 2024 | www.thebrahmi.com

**तेषूच्चतमकूटे हि वलरामस्य मन्दिरम् ।। (कु.भ-१/१६)**

श्यामलदुर्वादलमण्डित: श्यामायित: क्षेत्रराजि: सौन्दर्यस्य विविधरूपरेखं सृजति प्रतनोति च। एवं च हरितवर्णायितं दिगन्तं यदा कस्यचित् दृष्टिपथारुढं भवति तदा तत् मनोज्ञाय कल्पते। अतो हि कविना प्रतिपादितं यत्-

**शस्यक्षेत्रं श्रिय: कूटं लीलाक्षेत्रं सपार्षदम्!।**
**शस्यशामायिता: दिश: शस्यश्यामायितं सर्वम्।। (कु.भ-२/१०)**

कुशभद्रामहाकाव्येऽस्मिन् काश्यपमुने: शिष्यस्य आश्रमस्य सौन्दर्यवर्णनमतीव चमत्कारपूर्णम्। कुशभद्रानदीसन्निधौ ऋषे: काश्यपशिष्यस्य आश्रम: नितरामध्यात्मरासं रचयति। एवं च अत्र वृक्षमूले उषित्वा अपि वल्कलवन्त: भूत्वा तपस्विन: पञ्चाग्निसाधनायां नियुक्ता: सन्ति। तत्रापि कवि: श्रीप्रफुल्लमिश्र: वाह्यसौन्दर्यं प्रकटयति। तस्याश्रमस्य सौन्दर्यं शोभमानै: कुसुमफलपुष्पसंयुक्तै: तिलकतमालहिन्तालवकुलादिवृक्षै: भ्रमराणां झङ्कारै: मदोन्मत्तकोकिलानामव्यक्तस्वरै: तुरगनागगर्जितै: परिवर्द्धते। अपि च सुविस्तीर्णतृणालयै: स्वच्छनीरा महानीरा कुशभद्रानदी तस्या: अव्यक्तध्वनिभि: भृशंनिनादयति । एतादृशं सौन्दर्यं परिदृश्य कवि: मुनेराश्रमपदं नन्दनवनमिव परिकल्पयति । तथा हि कविना प्रतिपादितम्-

**महारण्ये भयाक्रान्ते हिंस्रश्वापदसंकुले।**
**ऋषे: काश्यपशिष्यस्य चाश्रम: परिशोभते।। (कु.भ-३/१)**
**स्वच्छनीरा: महानीरा: सुविस्तीर्णा तृणालया:।**
**फलपुष्पसुसमृद्धौ निन्दति नन्दनं वनम् ।। (कु.भ-३/६६)**

कवे: मानसमन्थनेन यत् वाक्यं नि:सरति तद्वाक्यं काव्यरूपेण परिणमते। कुशभद्रामहाकाव्यस्य चतुर्थसर्गे कविना यत् सौन्दर्यवर्णनं कृतम् तत् पठनेन पाठनेन च पाठका: विबुधा: सहृदया: निश्चप्रचतया आनन्दिता: भविष्यन्ति। अत: नायिकाया: भद्राया: सौन्दर्यवर्णनावसरे कथितं यत्-

**स्मेरमुखी हि लावण्यारतिनिन्दी स्फुटोपमा।**
**अनन्या गुणिनी सुश्री सात्विकप्राणपुष्कला।। (कु.भ-४/९)**

राजा कुशभद्रोऽपि भद्राया: सौन्दर्यं निरीक्ष्य वदति एतादृशी स्मेरमुखी लाबण्या रतिनिन्दी स्फुटोपमा अनन्या गुणिनी सुश्री  सुन्दरी नायिका मर्त्यलोके असम्भवा। केवलं स्वर्गे हि दृश्यते। यदा भद्रा कुशभद्रेण सह सविनयं वार्त्तालापं कृतवती तदा तस्या: वीणाया: सुमधुरां वाणीं श्रुत्वा राजा नवयौवनाभद्रायाः सौन्दर्येण विमोहितोऽभवत्। अत: कविना कथ्यते-

**रूपं निरूप्य राजाऽसौ भद्राया: नवयौवनम्।**
**स्वर्गस्था मन्यते चासौ मर्त्ये ह्येतदसम्भवम्।। (कु.भ-४/१०)**

अपि च तयो: चतुश्चक्षुर्मेलनेन मनसि प्रणयाङ्कुर: जायते। तयोरानन्दवर्धनं सुकुमारतरं विभर्ति। प्रणयविवर्द्धनहेतो: पिकशुकादीनां सुमधुरगानश्रवणादनन्तरं च तयो: हृदयकानने प्रेम संजातम्। अतो हि कविना नायिकानायकयोर्मध्ये स्थितमन्त: सौन्दर्यं प्रतिपादितम्। मेलनेन चतुश्चक्षु: .......तथा।। (कु.भ-४/१५) कवे: श्रीप्रफुल्लमिश्रपादानां सौन्दर्यस्य या पराकाष्ठा सा सर्वत्रैव अनुरणिता। कुशभद्रेण सह यदा भद्राया: मेलनं भवति तदा प्रणये प्रेमदम्पती प्रफुल्लतां प्राप्नुवन्ति। सानन्देन प्रेमवन्धने लग्नौ भवत:। अत: प्रणयेऽपि कवे: सौन्दर्यं प्रतिफलितम्-

**हृदये कानने कूले पिकशुकादिसंकुले ।**
**श्रवणात् मधुरं ध्वनिं प्रणयो हि विवर्द्धते ।। (कु.भ -४/१६)**
**मनसि हृदये वापि गभीराद् चित्तगह्वरे ।**
**शीतलं मनसो रूपं हृदि स्थिरायते ह्यपि ।। (कु.भ-४/१७)**
**अत: प्रफुल्लतां यात: प्रणये प्रेमदम्पती ।**
**मग्नौ सकलतारुण्ये लग्नौ भवत: बन्धने ।। (कु.भ-४/१८)**

## सौन्दर्यमहत्वम्:

तत्त्वतः कवेः सौन्दर्यचेतना तद्विरचितकाव्येषु बहुत्र समुल्लिखिता विद्यते। श्रीप्रफुल्लमिश्राणां सौन्दर्यचेतना सौन्दर्यस्य समक्षं रसिकस्य पराधीनतां स्पष्टीकरोति। अस्य रसिककवेः सकलेषु काव्यग्रन्थेषु शब्दार्थयोः रसिकता विद्यते। तस्य शृङ्गारचेतनार्थं सः भारतीयपाठकसमाजे प्रसिद्धः। सर्वेऽपि पण्डिताः व्युत्पन्नाः मेधाविनश्च कवेः सौन्दर्यस्य प्रभया विमुग्धाः। कवेर्भाषायां प्रेमशब्दस्यार्थः भवति प्रणयः प्रीतिः कान्तिः स्नेहः स्पृहा अनुरागः श्रद्धा सम्बेदनशीलता एकात्मता तन्मयता उल्लासः रसः आनन्दश्च। 'प्री" धातोः 'इमनिच्" प्रत्यययोगे प्रेमशब्दः निष्पन्नः। सौन्दर्ये प्रेम विलसति। यत्र सौन्दर्यं नास्ति तत्र प्रेम अपि नास्ति। कुशभद्रामहाकाव्ये कुशभद्र भद्रायाः सौन्दर्यं प्रति यदा आकृष्टः तदा तयोर्मध्ये प्रेम जातम् । अतो हि कुशभद्रामहाकाव्यस्य चतुर्थसर्गस्थत्रयोविंशतिश्लोकस्य पठनेन कवेर्मनसि स्वतस्फूर्त्तभावेन भावना समुदेति यथा –

**प्रेम स्थिरनदी प्रवाहसरला कामः तरङ्गाकुलः ।**
**प्रेम सुशीतलं निस्पन्दकोमलं कामः कूले प्लावनः।**
**प्रेमपूतनीरं हिमाङ्कधवलं कामानले धूमिलम्**
**प्रेम लज्जामुखं कुलवधूशीलं कामः हुताशानलः।। (कु.भ-४/२३)**

श्रीप्रफुल्लमिश्रः कुशभद्रामहाकाव्यस्य अष्टमसर्गे पुरीधाम्नः रासोत्सवस्य सोन्दर्यं प्रकटितवान्। तस्मिन् पुरीधाम्नि दोलवेदी अर्थात् मदनमोहनौ यत्र आन्दोलनेन खेलतः सा दोलवेदी अतीव रमणीया सुसज्जिता सती जनानां हृदि नितरामध्यात्मरासं रचयति। तत्र सर्वेषां अङ्गानि रङ्गेण सुशोभन्ते। जलस्य स्थूलरङ्गेणरञ्जिता सती तेषां हृदि मनः प्राणशरीरेषु प्रफुल्लता जायते। अतः कवेर्भाषायाम्-

**दोलवेदी पुरीधाम्नः रमणीया सुसज्जिता ।**
**मदनमहनौ यत्र आन्दोलनेन खेलतः ।। (कु.भ-८/१)**
**मनः प्राणशरीरेषु रङ्गेणाङ्ग सुशोभते ।**
**जलस्य स्थूलरङ्गेण रञ्जिता हृदि फुल्लिताः ।। (कु.भ-८/२)**

अपि च कविः पुर्यामवस्थितस्य श्रीजगन्नाथमन्दिरस्य सौन्दर्यं सुचारुरूपेण वर्णयन् तस्य विद्वत्बत्तायाः प्रमाणं प्रकटयति। पूर्वसमुद्रकल्लोल-नीलवीचिसुशोभित-नीलपर्वतचूडायां अनन्तकोटि-ब्रह्माण्डनायकस्य अनाथनाथश्रीजगन्नाथस्य मन्दिरं सुशोभते। तस्य मन्दिरस्य पताका सततं उड्डीयते। नीलचक्रे उड्डीयमानां तां पताकां वीक्ष्य यः दूरात् हस्तौ प्रसारयति तस्य पापतापहरणं सुनिश्चितं वर्त्तते। अत्र कवेर्कथनाभिप्रायः उड्डीयमानाश्वेतरक्तपताकायाः सौन्दयमवर्णनीयमकल्पनीयमभावनीयमचिन्तनीयमलेखनीयमनिर्वचनीयम् च। अतोहि-

**पूर्वसमुद्रकल्लोले नीलवीचिसुशोभिते**
**नीलपर्वतचूडायां मन्दिरमतिशोभितम्।। (कु.भ-८/९)**
**श्वेतरक्तपताकायाः फरफरायते सदा ।**
**दूरात् हस्तौ प्रसार्यते पापतापहराय सा ।। (कु.भ- ८/१०)**

## कविकृतसौन्दर्यमाधुर्यम्:

यः सोन्दर्यप्रेमी कविः स सर्वत्र सौन्दर्यतत्त्वं पश्यति। अतः श्रीप्रफुल्लकुमारमिश्रोऽपि सौन्दर्यप्रेमीत्वात् तस्य काव्ये सौन्दर्यतत्त्वं सर्वत्र प्राप्यते। कुशभद्रामहाकाव्यस्य अष्टमसर्गे परंब्रह्मपरमपुरुषश्रीजगन्नाथस्य नेत्रयोः सौन्दर्यं कविना वर्णितम्। शान्तकान्तभावविल- सितकमनीयनमनीयपूजनीयवन्दनीयपतितपावनश्रीजगन्नाथः कलौ दारुमये तनौ खगलनयने व्याप्य रङ्गाधरे हसति। यदा ये केऽपि सहृदयाः तस्य खगोलनेत्रे पश्यन्ति तदा अवश्यं सौन्दर्यापभोगं कुर्वन्ति। अतो हि कविना प्रतिपादितम्-

**महानीलमणिस्तत्र कलौ दारुमये तनौ ।**
**खगोलनयने व्याप्य रङ्गाधरे हसत्यसौ ।। (कु.भ-८/११)**

अपि च अक्षयतृतीयायां रथनिर्माणं भवति। शिल्पिनां रथनिर्माणरूपकं सौन्दर्यं सर्वे पश्यन्ति। सहस्राणि जनाः रथयात्रां वीक्ष्य आनन्दमनुभवन्ति। परन्तु एकः कविः भावुको वा रथस्य सौन्दर्यतत्त्वं पश्यति। तदनन्तरं ज्येष्ठमासे पूर्णिमायां

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 01 | Mar-May 2024 | www.thebrahmi.com

तिथौ स्नानयात्रा भवति। भगवत: श्रीजगन्नाथस्य स्नानयात्राया: अपूर्वशोभां वर्णयितुं के वा समर्था: भवन्ति? पुन: प्रभु: नूतनं यौवनमवाप्य रथारुढेन लीलया गुण्डिचामण्डपं व्रजति। अत्र श्रीप्रफुल्लमिश्रेण श्रीजगन्नाथस्य स्नानयात्राया: एवं रथयात्राया: सौन्दर्यं सुष्ठुतया प्रतिपादितम्-

**ज्येष्ठपौर्ण: तथा स्नानं ज्वराक्रान्त: भवेत् प्रभु: ।**
**नूतनं यौवनं प्राप्य गुण्डिचामण्डपं चलेत् ।। (कु.भ-८/१७)**

चिरस्रोता कलकलनिनादिनी कुशभद्रानदी यदा कोष्ठदेशं समागता तदा तस्या: प्रवाहितजलेन कोष्ठदेशस्य कृषिक्षेत्राणि शस्यशामायितानि बहुदूरत: शोभन्ते। कोष्ठदेशस्य कृषिक्षेत्राणां शोभा कविना अत्र वर्णिता। इत्यस्मिन् श्लोके कवि: शस्यश्यामायिता भूमि: अर्थात् विश्वनाथपुरं नाम ग्राम: शस्यश्यामलै: परिशोभित इति वर्णित:। अर्थात् इयं भूमि: पवित्रनद्या: भार्गव्या: स्रोतसा पुण्यमयी। अत्र हरिहरौ सर्वदैव पूज्यो भवत:। अपि च असौ विश्वनाथपुरं नाम ग्राम: प्राकृतिकसौन्दर्येण परिपूर्ण इति श्रीमिश्रमहोदयरचितस्य कुशभद्रानामाख्यस्य महाकाव्यस्य एकादशसर्गस्य विंशतितमश्लोकात् प्रतीयते। यथा-

**केतकीकुङ्कुमाम्रदि पुन्नागनागकेशरै: ।**
**वेतसजम्बुकुञ्जाभ्यामाम्रपनसविल्वादि ।। (कु.भ-११/२)**

अस्मिन् श्लोके प्रतिभाति यत् ग्रामोऽयं केतकी-कुङ्कुम-आम्र-पुन्नाग-नागकेशरैः वृक्षै: तथा तेषां फलपुष्पादिभि: ग्रामस्य सौन्दर्यं मनोमुग्धकरम्। अपि च वेतस-जम्बुकुञ्ज-आम्रपनस-विल्वादिफलपुष्पसमृद्धवृक्षै: ग्राम: सर्वत: सौन्दर्येण सुशोभित: इति कविना प्रतिपादितम्। अपि च पञ्चविंशतितमे श्लोके इत्थं प्रतीयते यथा-

**कमलोत्पलकह्लार मल्लीवल्यादियूथिका: ।**
**सुरभिणा हि मोद्यन्ते सुजलां सुफलां भूमिम् ।। (कु.भ-११/२५)**

## उपसंहार:

कविप्रफुल्लमिश्र: कुशभद्रानद्या: सौन्दर्यवर्णनं अतीवचमत्कारतया वर्णितवान्। साम्प्रतं वैज्ञानिकयुगे विज्ञानस्य अग्रगतिद्वारा योगतपोयज्ञदानादीनि पुण्यकार्याणि विनष्टानि जायन्ते। परन्तु नदीमाताकुशभद्रा दीर्घात् दीर्घतरा भूत्वा महानद्यां सुसंयुक्ता। सौन्दर्यपिपासु: कवि: श्रीप्रफुल्लमिश्र: उत्कलप्रदेशस्य कोणानुकोणं परिभ्रम्य सौन्दर्यं निपीय च तस्य काव्येषु तत् प्रकटितवान्। कदापि कवि: सौन्दर्यप्रभावात् आत्मानं विमोक्तुं न समर्थ:। जीवनमरणचक्राभ्यां वयं सर्वे आबद्धा:। एतत् सर्वं ज्ञात्वाऽपि कवे: हृदय: सौन्दर्यविमुग्ध: भवति। यदा मुनेरभिशापेन राज्यं ध्वस्तविध्वस्तमभवत्, प्रजागण: नष्ट: संजात:, कुशभद्रोऽपि मृतवान् तदा मुनिकन्याभद्राया: क्लेश- कारुण्यं क्रन्दनञ्च को वा वर्णयितुं सक्षम: भविष्यति। कुशभद्रस्य भस्मावशेषेण भद्रा स्वात्मकथां स्मारं स्मारं रुरोद। तदनन्तरं सा नदीरूपगत्या प्रवाहिता सती समुद्रे लीना जाता। अत्र भद्राया: दु:खेनापि दु:खितस्य कवे: सौन्दर्यं प्रतिफलितम्। मातृरूपा सा कुशभद्रानदी धर्मार्थकाममोक्षाणां चतुर्वर्गाणां पुरुषार्थप्रदायिनी। सा स्वच्छनीरा महातोयाऽपि च सृष्टि-वृष्टिविलासिनी भवति। अपि च सा कनकसिकतादेहा वर्त्तते। अत: लोककल्याणकारिण्या: मङ्गलप्रदायिन्या: महोदधिगामिन्या: नदीमातृकुशभद्राया: सौन्दर्यवर्णनावसरे कविना प्रतिपादितं यत्-

**मातृरूपा नदी सेयंचतुर्वर्गप्रदायिनी ।**
**स्वच्छनीरा महातोयासृष्टि-वृष्टि-विलासिनी।। (कु.भ-५/३७)**
**प्रवहति नदीमाता गामिन्यपि महोदधिम् ।**
**कुटिलेन गति तस्या लोककल्याणकारिणी ।। (कु.भ-६/१)**

अलं बहुना प्रकृत्या काव्ये स्थितानां शब्दानां सौन्दर्यं हि पाठकमनासिं रञ्जयति। सोन्दर्यं वै दु:खं दूरीकरोति। अतोहि सौन्दर्यं प्रति सर्वे प्राणिन: आकृष्टा भवन्ति। अत: कवि: श्रीमिश्रमहोदय: स्वकीये कुशभद्रानामाख्ये महाकाव्ये न केवल शब्दार्थयो: सौन्दर्यं वर्णितवान् अपि तु सरलतया सुचारुरुपेण च स्थितानां पर्वत-नदी-आश्रम-ग्राम-तटभूमि इत्यादीनां सौन्दर्यं प्रकटीकृत्य पाठकानां सविधे सदा वन्दनीय: नमनीय: स्मरणीय: राराजते।

## सहायकग्रन्थसूची

१.मिश्रः, श्रीप्रफुल्लकुमारः, आधुनिकसंस्कृतसाहित्यम्, उत्कलविश्वविद्यालयः, भुवनेश्वरम् ।

२.मिश्रः, श्रीप्रफुल्लकुमारः, कविताभुवनेश्वरी, स्नातकोत्तरसंस्कृतविभागः, उत्कलविश्वविद्यालयः, वाणीविहारः, भुवनेश्वरम्, प्रथमसंस्करणम्-२००६

३. मिश्रः, श्रीप्रफुल्लकुमारः, कुशभद्रामहाकाव्यम्, प्रकाशिका-धारा श्रीराधा ट्रष्ट्, एम्-४९, मारुतिविहार, महापात्रलेन्, नन्दनकानन, भुवनेश्वर, ओडिशा, पिन्-७५४००, प्रथमसंस्करणम्- २०१९

४. रथः, सूर्यमणिः, ध्वन्यालोकरहस्यम्, सांविदीप्रकाशनम्, पुरी, तृतीयसंस्करणम्-२०१०

५. शतपथी, हरेकृष्णः, संस्कृतसाहित्य इतिहासः, जेसिकेटावार, कलेज स्कोयार्, कितावमहल, कटक, चतुर्थसंस्करणम्-२००८

६. शर्मा, केदारनाथः, काव्यालंकारसूत्रवृत्तिः, चौखम्बासंस्कृतसंस्थान, वाराणासी

७. शर्मा, रमणकुमारः, काव्यालंकारः, विद्यानिधिप्रकाश:

8. आचार्यः, वासुदेवप्रसादः, शिशुपालबधमहाकाव्यम्, सांविदीप्रकाशनम्, पुरी, 2001